# Shiva Mahimna Stotram

### ଏହି ପାଠଗୁଡ଼ିକ ବିଷୟରେ

| | |
|---|---|
| ଉତ୍ସ | ପ୍ରତ୍ୟେକ ପାଠ ନିଜ ଉତ୍ସ, ପରମ୍ପରା ଓ ସଂସ୍କରଣ ସହିତ ଛପା ହୋଇଛି। ଅନ୍ୟ ପରମ୍ପରା ଓ ସଂସ୍କରଣରେ ଶବ୍ଦରେ ସାମାନ୍ୟ ପାର୍ଥକ୍ୟ ଥାଇପାରେ। |
| ଲିପ୍ୟନ୍ତରଣ | ରୋମାନ ଧାଡ଼ି ଦେବନାଗରୀରୁ ପ୍ରସ୍ତୁତ IAST ଲିପ୍ୟନ୍ତରଣ (ā = ଦୀର୍ଘ ଆ, ṃ = ଅନୁସ୍ୱାର, ḥ = ବିସର୍ଗ, ś/ṣ = ଶ/ଷ, c = ଚ)। ହିନ୍ଦୀ, ଅୱଧୀ ଓ ବ୍ରଜ ପାଠରେ ଶବ୍ଦ ଶେଷର ଅଉଚ୍ଚାରିତ "a" ଛାଡ଼ିଦିଆଯାଏ। ଲିପ୍ୟନ୍ତରଣରେ ବୈଦିକ ସ୍ୱର ଦେଖାଯାଏ ନାହିଁ। |

## Shiva Mahimna Stotram

| | |
|---|---|
| ପ୍ରକାର | ସ୍ତୋତ୍ର |
| ଦେବତା | ଶିବ |
| ସଂସ୍କରଣ | Verified text |
| ପରମ୍ପରା | ଶୈବ |
| ଉତ୍ସ | Brihat Stotra Ratnakara, vol. 1 (1953) — Vol. 1, scan pages 213–222 |
| କୃତଜ୍ଞତା | Text: Brihat Stotra Ratnakara vol. 1 (1953) via Sanskrit Wikisource contributors (CC BY-SA 4.0). Verification, summary and meaning: Udyog Jyotish editorial team. |
| କପିରାଇଟ୍ | Text in the public domain. Transcription from Sanskrit Wikisource, CC BY-SA 4.0. |

पुष्पदन्त उवाच

puṣpadanta uvāca

महिम्नः पारं ते परमविदुषो यद्यसदृशी

mahimnaḥ pāraṃ te paramaviduṣo yadyasadṛśī

स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।

stutirbrahmādīnāmapi tadavasannāstvayi giraḥ |

अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्

athāvācyaḥ sarvaḥ svamatipariṇāmāvadhi gṛṇan

ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १ ॥

mamāpyeṣa stotre hara nirapavādaḥ parikaraḥ || 1 ||

अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।

atītaḥ panthānaṃ tava ca mahimā vāṅmanasayoratadvyāvṛttyā yaṃ cakitamabhidhatte śrutirapi |

स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः

sa kasya stotavyaḥ katividhaguṇaḥ kasya viṣayaḥ

पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥

pade tvarvācīne patati na manaḥ kasya na vacaḥ || 2 ||

मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् ।

madhusphītā vācaḥ paramamamṛtaṃ nirmitavatastava brahmankiṃ vāgapi suragurorvismayapadam |

मम त्वेतां वाणीं गुणकथनपुण्येन भवतः

mama tvetāṃ vāṇīṃ guṇakathanapuṇyena bhavataḥ

पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥

punāmītyarthe'smin puramathana buddhirvyavasitā || 3 ||

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रळयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।

tavaiśvaryaṃ yattajjagadudayarakṣāpraḷayakṛttrayīvastu vyastaṃ tisṛṣu guṇabhinnāsu tanuṣu |

अभव्यानामस्मिन्वरद रमणीयामरमणीं

abhavyānāmasminvarada ramaṇīyāmaramaṇīṃ

विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥

vihantuṃ vyākrośīṃ vidadhata ihaike jaḍadhiyaḥ || 4 ||

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं

kimīhaḥ kiṃkāyaḥ sa khalu kimupāyastribhuvanaṃ

किमाधारो धाता सृजति किमुपादान इति च ।

kimādhāro dhātā sṛjati kimupādāna iti ca |

अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः

atarkyaiśvarye tvayyanavasaraduḥstho hatadhiyaḥ

कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥

kutarko'yaṃ kāṃścinmukharayati mohāya jagataḥ || 5 ||

अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति ।

ajanmāno lokāḥ kimavayavavanto'pi jagatāmadhiṣṭhātāraṃ kiṃ bhavavidhiranādṛtya bhavati |

अनीशो वा कुर्याद्भुवनजनने कः परिकरो

anīśo vā kuryādbhuvanajanane kaḥ parikaro

यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६ ॥

yato mandāstvāṃ pratyamaravara saṃśerata ime || 6 ||

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति

trayī sāṃkhyaṃ yogaḥ paśupatimataṃ vaiṣṇavamiti

प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।

prabhinne prasthāne paramidamadaḥ pathyamiti ca |

रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां

rucīnāṃ vaicitryādṛjukuṭilanānāpathajuṣāṃ

नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥

nṛṇāmeko gamyastvamasi payasāmarṇava iva || 7 ||

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः

mahokṣaḥ khaṭvāṅgaṃ paraśurajinaṃ bhasma phaṇinaḥ

कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।

kapālaṃ cetīyattava varada tantropakaraṇam |

सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां

surāstāṃ tāmṛddhiṃ dadhati tu bhavadbhrūpraṇihitāṃ

न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥

na hi svātmārāmaṃ viṣayamṛgatṛṣṇā bhramayati || 8 ||

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं

dhruvaṃ kaścitsarvaṃ sakalamaparastvadhruvamidaṃ

परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।

paro dhrauvyādhrauvye jagati gadati vyastaviṣaye |

समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव


ଉକ୍ତ ଟିପ୍ପଣୀ ସହିତ ପାରମ୍ପରିକ ପାଠ। କୌଣସି ନିଶ୍ଚିତ ଫଳର ଦାବି କରାଯାଏ ନାହିଁ

samaste'pyetasminpuramathana tairvismita iva

स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९ ॥

stuvañjihremi tvāṃ na khalu nanu dhṛṣṭā mukharatā || 9 ||

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः

tavaiśvaryaṃ yatnādyadupari viriñco hariradhaḥ

परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।

paricchettuṃ yātāvanalamanalaskandhavapuṣaḥ |

ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्

tato bhaktiśraddhābharagurugṛṇadbhyāṃ giriśa yat

स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥

svayaṃ tasthe tābhyāṃ tava kimanuvṛttirna phalati || 10 ||

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं

ayatnādāpādya tribhuvanamavairavyatikaraṃ

दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।

daśāsyo yadbāhūnabhṛta raṇakaṇḍūparavaśān |

शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः

śiraḥpadmaśreṇīracitacaraṇāmbhoruhabaleḥ

स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११ ॥

sthirāyāstvadbhaktestripurahara visphūrjitamidam || 11 ||

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं

amuṣya tvatsevāsamadhigatasāraṃ bhujavanaṃ

बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः।

balātkailāse'pi tvadadhivasatau vikramayataḥ|

अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि

alabhyā pātāle'pyalasacalitāṅguṣṭhaśirasi

प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥ १२ ॥

pratiṣṭhā tvayyāsīddhruvamupacito muhyati khalaḥ || 12 ||

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।

yadṛddhiṃ sutrāmṇo varada paramoccairapi satīmadhaścakre bāṇaḥ parijanavidheyatribhuvanaḥ |

न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३ ॥

na taccitraṃ tasminvarivasitari tvaccaraṇayorna kasyā unnatyai bhavati śirasastvayyavanatiḥ || 13 ||

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनयन विषं संहृतवतः ।

akāṇḍabrahmāṇḍakṣayacakitadevāsurakṛpāvidheyasyā''sīdyastrinayana viṣaṃ saṃhṛtavataḥ |

स कल्माषः कण्ठे तव न कुरुते न श्रियमहो

sa kalmāṣaḥ kaṇṭhe tava na kurute na śriyamaho

विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४ ॥

vikāro'pi ślāghyo bhuvanabhayabhaṅgavyasaninaḥ || 14 ||

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे

asiddhārthā naiva kvacidapi sadevāsuranare

निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।


ଉକ୍ତ ଟିପ୍ପଣୀ ସହିତ ପାରମ୍ପରିକ ପାଠ। କୌଣସି ନିଶ୍ଚିତ ଫଳର ଦାବି କରାଯାଏ ନାହିଁ

nivartante nityaṃ jagati jayino yasya viśikhāḥ |

स पश्यन्नीश त्वामितरसुरसाधारणमभूत्

sa paśyannīśa tvāmitarasurasādhāraṇamabhūt

स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥ १५ ॥

smaraḥ smartavyātmā na hi vaśiṣu pathyaḥ paribhavaḥ || 15 ||

मही पादाघाताद्व्रजति सहसा संशयपदं

mahī pādāghātādvrajati sahasā saṃśayapadaṃ

पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।

padaṃ viṣṇorbhrāmyadbhujaparigharugṇagrahagaṇam |

मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा

muhurdyaurdausthyaṃ yātyanibhṛtajaṭātāḍitataṭā

जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥

jagadrakṣāyai tvaṃ naṭasi nanu vāmaiva vibhutā || 16 ||

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः

viyadvyāpī tārāgaṇaguṇitaphenodgamaruciḥ

प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।

pravāho vārāṃ yaḥ pṛṣatalaghudṛṣṭaḥ śirasi te |

जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥ १७ ॥

jagaddvīpākāraṃ jaladhivalayaṃ tena kṛtamityanenaivonneyaṃ dhṛtamahima divyaṃ tava vapuḥ || 17 ||

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो

rathaḥ kṣoṇī yantā śatadhṛtiragendro dhanuratho

रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।

rathāṅge candrārkau rathacaraṇapāṇiḥ śara iti |

दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८ ॥

didhakṣoste ko'yaṃ tripuratṛṇamāḍambaravidhirvidheyaiḥ krīḍantyo na khalu paratantrāḥ prabhudhiyaḥ || 18 ||

हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।

hariste sāhasraṃ kamalabalimādhāya padayoryadekone tasminnijamudaharannetrakamalam |

गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा

gato bhaktyudrekaḥ pariṇatimasau cakravapuṣā

त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ १९ ॥

trayāṇāṃ rakṣāyai tripurahara jāgarti jagatām || 19 ||

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां

kratau supte jāgrattvamasi phalayoge kratumatāṃ

क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।

kva karma pradhvastaṃ phalati puruṣārādhanamṛte |

अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं

atastvāṃ samprekṣya kratuṣu phaladānapratibhuvaṃ

श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ॥ २० ॥

śrutau śraddhāṃ badhvā dṛḍhaparikaraḥ karmasu janaḥ || 20 ||

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।


ଉକ୍ତ ଟିପ୍ପଣୀ ସହିତ ପାରମ୍ପରିକ ପାଠ। କୌଣସି ନିଶ୍ଚିତ ଫଳର ଦାବି କରାଯାଏ ନାହିଁ

kriyādakṣo dakṣaḥ kratupatiradhīśastanubhṛtāmṛṣīṇāmārtvijyaṃ śaraṇada sadasyāḥ suragaṇāḥ |

क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो

kratubhreṣastvattaḥ kratuphalavidhānavyasanino

ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१ ॥

dhruvaṃ kartuḥ śraddhāvidhuramabhicārāya hi makhāḥ || 21 ||

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं

prajānāthaṃ nātha prasabhamabhikaṃ svāṃ duhitaraṃ

गतां रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।

gatāṃ rohidbhūtāṃ riramayiṣumṛṣyasya vapuṣā |

धनुःपाणेर्यातं दिवमपि सपत्राकृतममुं

dhanuḥpāṇeryātaṃ divamapi sapatrākṛtamamuṃ

त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥

trasantaṃ te'dyāpi tyajati na mṛgavyādharabhasaḥ || 22 ||

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।

svalāvaṇyāśaṃsā dhṛtadhanuṣamahnāya tṛṇavatpuraḥ pluṣṭaṃ dṛṣṭvā puramathana puṣpāyudhamapi |

यदि स्त्रैणं देवी यमनिरतदेहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ २३ ॥

yadi straiṇaṃ devī yamaniratadehārdhaghaṭanādavaiti tvāmaddhā bata varada mugdhā yuvatayaḥ || 23 ||

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।

śmaśāneṣvākrīḍā smarahara piśācāḥ sahacarāścitābhasmālepaḥ sragapi nṛkaroṭīparikaraḥ|

अमङ्गल्यं शीलं तव भवतु नामैवमखिलं

amaṅgalyaṃ śīlaṃ tava bhavatu nāmaivamakhilaṃ

तथाऽपि स्मर्तॄणां वरद परमं मङ्गलमसि ॥ २४ ॥

tathā'pi smartṝṇāṃ varada paramaṃ maṅgalamasi || 24 ||

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः

manaḥ pratyakcitte savidhamavadhāyāttamarutaḥ

प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।

prahṛṣyadromāṇaḥ pramadasalilotsaṅgitadṛśaḥ |

यदालोक्याह्लादं ह्रद इव निमज्यामृतमये

yadālokyāhlādaṃ hrada iva nimajyāmṛtamaye

दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २५ ॥

dadhatyantastattvaṃ kimapi yaminastatkila bhavān || 25 ||

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।

tvamarkastvaṃ somastvamasi pavanastvaṃ hutavahastvamāpastvaṃ vyoma tvamu dharaṇirātmā tvamiti ca |

परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं

paricchinnāmevaṃ tvayi pariṇatā bibhrati giraṃ

परं विद्मस्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥ २६ ॥

paraṃ vidmastattvaṃ vayamiha tu yattvaṃ na bhavasi || 26 ||

त्रयी तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।

trayī tisro vṛttīstribhuvanamatho trīnapi surānakārādyairvarṇaistribhirabhidadhattīrṇavikṛti |

तुरीयं ते धाम ध्वनिभिरविरुन्धानमणुभिः

turīyaṃ te dhāma dhvanibhiravirundhānamaṇubhiḥ

समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ २७ ॥

samastavyastaṃ tvāṃ śaraṇada gṛṇātyomiti padam || 27 ||

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।

bhavaḥ śarvo rudraḥ paśupatirathograḥ saha mahāṃstathā bhīmeśānāviti yadabhidhānāṣṭakamidam |

अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि

amuṣminpratyekaṃ pravicarati deva śrutirapi

प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते ॥ २८ ॥

priyāyāsmai dhāmne pravihitanamasyo'smi bhavate || 28 ||

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो

namo nediṣṭhāya priyadava daviṣṭhāya ca namo

नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।

namaḥ kṣodiṣṭhāya smarahara mahiṣṭhāya ca namaḥ|

नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो

namo varṣiṣṭhāya trinayana yaviṣṭhāya ca namo

नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥ २९ ॥

namaḥ sarvasmai te tadidamiti śarvāya ca namaḥ || 29 ||

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः

bahularajase viśvotpattau bhavāya namo namaḥ

प्रबलतमसे तत्संहारे हराय नमो नमः।

prabalatamase tatsaṃhāre harāya namo namaḥ|

जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः

janasukhakṛte sattvodriktau mṛḍāya namo namaḥ

प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३० ॥

pramahasi pade nistraiguṇye śivāya namo namaḥ || 30 ||

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं

kṛśapariṇati cetaḥ kleśavaśyaṃ kva cedaṃ

क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।

kva ca tava guṇasīmollaṅghinī śaśvadṛddhiḥ |

इति चकितममन्दीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१ ॥

iti cakitamamandīkṛtya māṃ bhaktirādhādvarada caraṇayoste vākyapuṣpopahāram || 31 ||

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे

asitagirisamaṃ syātkajjalaṃ sindhupātre

सुरतरुवरशाखा लेखनी पत्रमुर्वी ।

surataruvaraśākhā lekhanī patramurvī |

लिखति यदि गृहीत्वा शारदा सर्वकालं

likhati yadi gṛhītvā śāradā sarvakālaṃ

तदपि तव गुणानामीश पारं न याति ॥ ३२ ॥

tadapi tava guṇānāmīśa pāraṃ na yāti || 32 ||

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।


ଉକ୍ତ ଟିପ୍ପଣୀ ସହିତ ପାରମ୍ପରିକ ପାଠ। କୌଣସି ନିଶ୍ଚିତ ଫଳର ଦାବି କରାଯାଏ ନାହିଁ

asurasuramunīndrairarcitasyendumaulergrathitaguṇamahimno nirguṇasyeśvarasya |

सकलगुणवरिष्ठः पुष्पदन्ताभिधानो

sakalaguṇavariṣṭhaḥ puṣpadantābhidhāno

रुचिरमलघुवृत्तः स्तोत्रमेतच्चकार ॥ ३३ ॥

ruciramalaghuvṛttaḥ stotrametaccakāra || 33 ||

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्

aharaharanavadyaṃ dhūrjaṭeḥ stotrametat

पठति परमभक्त्या शुद्धचित्तः पुमान्यः ।

paṭhati paramabhaktyā śuddhacittaḥ pumānyaḥ |

स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र

sa bhavati śivaloke rudratulyastathā'tra

प्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च ॥ ३४ ॥

pracurataradhanāyuḥputravānkīrtimāṃśca || 34 ||

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।

maheśānnāparo devo mahimno nāparā stutiḥ |

अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥ ३५ ॥

aghorānnāparo mantro nāsti tattvaṃ guroḥ param || 35 ||

दीक्षादानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।

dīkṣādānaṃ tapastīrthaṃ jñānaṃ yāgādikāḥ kriyāḥ |

महिम्नस्तवपाठस्य कलां नार्हति षोडशीम् ॥ ३६ ॥

mahimnastavapāṭhasya kalāṃ nārhati ṣoḍaśīm || 36 ||

कुसुमदशननामा सर्वगन्धर्वराजः

kusumadaśananāmā sarvagandharvarājaḥ

शशिधरवरमौलेर्देवदेवस्य दासः ।

śaśidharavaramaulerdevadevasya dāsaḥ |

स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्

sa gurunijamahimno bhraṣṭa evāsya roṣāt

स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३७ ॥

stavanamidamakārṣīddivyadivyaṃ mahimnaḥ || 37 ||

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं

suravaramunipūjyaṃ svargamokṣaikahetuṃ

पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।

paṭhati yadi manuṣyaḥ prāñjalirnānyacetāḥ |

व्रजति शिवसमीपं किन्नरः स्तूयमानः

vrajati śivasamīpaṃ kinnaraḥ stūyamānaḥ

स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३८ ॥

stavanamidamamoghaṃ puṣpadantapraṇītam || 38 ||

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन

śrīpuṣpadantamukhapaṅkajanirgatena

स्तोत्रेण किल्बिषहरेण हरप्रियेण ।


ଉକ୍ତ ଟିପ୍ପଣୀ ସହିତ ପାରମ୍ପରିକ ପାଠ। କୌଣସି ନିଶ୍ଚିତ ଫଳର ଦାବି କରାଯାଏ ନାହିଁ

stotreṇa kilbiṣahareṇa harapriyeṇa |

कण्ठस्थितेन पठितेन समाहितेन

kaṇṭhasthitena paṭhitena samāhitena

सुप्रीणितो भवति भूतपतिर्महेशः ॥ ३९ ॥

suprīṇito bhavati bhūtapatirmaheśaḥ || 39 ||

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः ।

ityeṣā vāṅmayī pūjā śrīmacchaṅkarapādayoḥ |

अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥ ४० ॥

arpitā tena deveśaḥ prīyatāṃ me sadāśivaḥ || 40 ||

## ଅର୍ଥ

The poet begins by admitting that even Brahma and the Vedas fall short of Shiva's greatness, so his own praise is only to purify his speech. He answers doubters who ask how an unseen lord could make the world, recalls Shiva as the column of fire that Brahma and Vishnu could not measure, the burning of the three cities and of Kama, and the ash, skulls and serpents that are still auspicious for those who remember him. Shiva is praised as the sun, moon, wind, fire, water, sky and earth, and as the meaning of Om. The closing verses name Pushpadanta, a gandharva king, and say even an ocean of ink with the earth as paper could not finish describing Shiva's qualities.


ଉକ୍ତ ଟିପ୍ପଣୀ ସହିତ ପାରମ୍ପରିକ ପାଠ। କୌଣସି ନିଶ୍ଚିତ ଫଳର ଦାବି କରାଯାଏ ନାହିଁ

## ଏହି ଦଲିଲ ବିଷୟରେ

ଏହି ଦଲିଲର ପାଠଗୁଡ଼ିକ ସାର୍ବଜନୀନ (ପବ୍ଲିକ୍ ଡୋମେନ୍) ବା ଆମ ଦଳ ଦ୍ୱାରା ଲିଖିତ ପାରମ୍ପରିକ ଭକ୍ତି ପାଠ, ନିଜ ଲିପିବଦ୍ଧ ଉତ୍ସ ଓ ସଂସ୍କରଣ ସହିତ ଛପା ହୋଇଛି।

ଅର୍ଥଗୁଡ଼ିକ ଆମ ନିଜ ଶବ୍ଦରେ ସଂକ୍ଷିପ୍ତ ବ୍ୟାଖ୍ୟା, ବିଦ୍ୱତ୍ପୂର୍ଣ୍ଣ ଅନୁବାଦ ନୁହେଁ। କୌଣସି ପାଠର ନିଜ ଶ୍ଲୋକରେ ଉଲ୍ଲିଖିତ ଲାଭ ପାଠର ଅଂଶ, ଗ୍ୟାରେଣ୍ଟି ନୁହେଁ।

କେତେକ ସାଧନା ପରମ୍ପରା ଅନୁସାରେ ଗୁରୁଙ୍କ ମାର୍ଗଦର୍ଶନରେ କରାଯାଏ। ନିଜ ପରମ୍ପରାର ମାର୍ଗଦର୍ଶନ ଅନୁସରଣ କରନ୍ତୁ।


ଉତ୍ସ ଟିପ୍ପଣୀ ସହିତ ପାରମ୍ପରିକ ପାଠ। କୌଣସି ନିଶ୍ଚିତ ଫଳର ଦାବି କରାଯାଏ ନାହିଁ